# विषय-सूची


| क्र.सं. | पाठ | पृ. सं. |
|---|---|---|
| • | परिचयः | |
| • | शिष्टाचारः | |
| • | हे प्रभो! | 1 |
| 1. | मधुरा प्रभातवेला | 2 |
| 2. | मम परिवारः | 7 |
| 3. | वयम् पश्यामः जन्तुशालाम् | 12 |
| 4. | शाकहट्टम् | 19 |
| 5. | अस्माकम् प्रियमित्राणि (पक्षिणः) | 23 |
| 6. | ये फलानि खादन्ति ते सुखिनः वसन्ति | 28 |
| 7. | चित्रप्रदर्शनी | 32 |
| 8. | अभिनवः किम् किम् करोति? | 35 |
| 9. | विडालः कुत्र अस्ति? | 40 |
| 10. | आगच्छ! गायामः | 43 |
| 11. | हरिणम् मा मारय! | 47 |
| 12. | कथयन्तु! कस्य कः वर्णः? | 51 |
| 13. | कः चतुरः अस्ति? | 57 |
| 14. | कति वस्तूनि सन्ति? | 60 |
| • | सङ्ख्या | 64 |
| • | इदम् अस्माकं शरीरम् | 66 |

# शिष्टाचारः





| | | | |
|---|---|---|---|
| सुप्रभातम् | – | प्रातः का नमस्कार। | (Good Morning) |
| सुमध्याह्नम् | – | दोपहर का नमस्कार। | (Good Afternoon) |
| शुभसायम् | – | सायंकाल का नमस्कार। | (Good Evening) |
| शुभरात्रिः | – | रात का नमस्कार। | (Good Night) |
| धन्यवादः | – | धन्यवाद। | (Thank You) |
| स्वागतम् | – | स्वागत है। | (Welcome) |
| कृपया | – | कृपया। | (Please) |
| समीचीनम् | – | बहुत अच्छा। | (Very Good) |
| अस्तु | – | ठीक है। | (All Right) |
| क्षम्यताम् | – | क्षमा करें। | (Excuse Me) |
| पुनः मिलामः | – | फिर मिलते हैं। | (See you again) |

# हे प्रभो!






**मह्यम्** सद्बुद्धिम् **यच्छ**,
सत्कार्याणि **करिष्यामि**।

मह्यम् शरीरबलम् प्रयच्छ,
अन्येषाम् रक्षाम् करिष्यामि।





मह्यम् मधुरवाणीम् प्रयच्छ,
सदैव मधुरम् **वदिष्यामि**।



मह्यम् श्रवणशक्तिम् प्रयच्छ,
हितवचनानाम् श्रवणम् करिष्यामि।


***एषः पाठः केवलं प्रार्थना-रूपेण कक्षायां सस्वरं पठनाय न तु अभ्यासाय।***

**शब्दार्थ–महयम्**=मुझे (to me), **यच्छ**=दो (give), **करिष्यामि**=करूँगा/करूँगी ((I) will do), **वदिष्यामि**=बोलूँगा/बोलूँगी ((I) will speak)

प्रथमः पाठः

# मधुरा प्रभातवेला





अहा! **मधुरा** प्रभातवेला। आकाशे सूर्यः उदितः। अन्धकारः गतः। सर्वत्र प्रकाशः एव प्रकाशः **अस्ति**। खगाः आकाशे **अत्र-तत्र** भ्रमन्ति। वृक्षेषु वानराः कूर्दन्ति। जनाः प्रसन्नाः **सन्ति**। **ते** उद्यानेषु भ्रमन्ति धावन्ति च। बालाः **अपि** उद्यानेषु क्रीडन्ति। पशवः अपि प्रसन्नाः सन्ति। ते वनेषु अत्र-तत्र गच्छन्ति। **सर्वे** जनाः **स्वकार्येषु** संलग्नाः भविष्यन्ति।

अहा! धन्या **एषा** सुखदायिनी प्रभातवेला।

---

**शब्दार्थ**–मधुरा=सुहावनी (pleasant), **अस्ति**=है (is), **अत्र-तत्र**=यहाँ-वहाँ (here-there), **सन्ति**=हैं (are), **ते**=वे (they), **अपि**=भी (too), **सर्वे**=सब (all), **स्वकार्येषु**=अपने कामों में (in their own works/jobs), **एषा**=यह (एक) (स्त्रीलिङ्ग)(this (one)) (feminine)

## अभ्यासः

1. चित्राणि दृष्ट्वा रिक्तस्थानानि पूरयत–



(क) आकाशे .............................. उदितः।



(ख) .............................. आकाशे उड्डयन्ति।



(ग) .............................. क्रीडन्ति।



(घ) .............................. वृक्षेषु कूर्दन्ति।

2. **उदाहरणम् पठित्वा प्रश्नानाम् उत्तराणि लिखत 'आम्' अथवा 'न'–**

**उदाहरणम्**–किम् प्रभातवेला मधुरा अस्ति? ........आम्........

(क) किम् सूर्य: प्रभातवेलायाम् उदित: भवति? ........................

(ख) किम् प्रात: वानरा: अपि प्रसन्ना: भवन्ति? ........................

(ग) किम् बाला: उद्यानेषु क्रीडन्ति? ........................

(घ) किम् वानरा: आकाशे भ्रमन्ति? ........................

(ङ) किम् प्रभातवेला सुखदायिनी अस्ति? ........................

3. **चित्रं दृष्ट्वा वदन्तु लिखन्तु च सत्यम्/असत्यम् वा–**



**यथा**– सूर्य: उदित: अस्ति। ........सत्यम्........

(क) वानरा: वृक्षस्य अध: सन्ति। ........................


(ख) बालका: धावन्ति। ........................

(ग) पुष्पाणि सन्ति। ........................

(घ) द्वौ कुक्कुरौ स्त:। ........................

4. चित्रं दृष्ट्वा वदन्तु 'आम्' अथवा 'न'–

किं चित्रे–




(क) पर्वतः अस्ति?

(ख) नदी अस्ति?

(ग) हंसः अस्ति?

(घ) सिंहः अस्ति?

(ङ) बालः अस्ति?

(च) कुक्कुरः अस्ति?


(छ) नौका अस्ति?

(ज) पत्रम् अस्ति?

(झ) बालिका अस्ति?

(ञ) वृक्षः अस्ति?

5. उपरिदत्तं चित्रं दृष्ट्वा नामानि लिखन्तु–


(क)  ..............................................................




(ख) ..................................................................



(ग) ..................................................................



(घ) ..................................................................



(ङ) ..................................................................

**द्वितीयः पाठः**

# मम परिवारः



निशा – मधुर! अत्र आगच्छ। पश्य, इदम् चित्रम्।

(मधुरः चित्रम् पश्यति)

मधुरः – अहा! इदम् मम चित्रम् अस्ति।

निशा – भवान् कथम् अवगच्छति?

मधुरः – पश्यतु एषः अहम्।

निशा – एषः कः?

मधुरः – एषः मम पिता।




निशा – एषा का?

मधुरः – एषा मम माता।

निशा – एषः कः?

मधुरः – एषः मम अनुजः।

निशा – एषः कः?



मधुरः – एषः मम ज्येष्ठः भ्राता।

निशा – मधुर! अधुना **अवगच्छामि** एषः तव पिता, एषा तव माता, एषः तव अनुजः, एषः ज्येष्ठः भ्राता।

**शब्दार्थ–इदम्**=यह (एक) (this (one)), **अवगच्छामि**=समझता हूँ/समझती हूँ ((I) understand)

## अभ्यासः

1. अधोलिखितानि रिक्तस्थानानि पूरयन्तु–



(क) एषः कः अस्ति?

............................ पुरुषः अस्ति।



(ख) एषा का अस्ति?

............................ महिला अस्ति।



(ग) एषः कः अस्ति?

............................ चिकित्सकः अस्ति।



(घ) एषा का अस्ति?

............................ चिकित्सिका अस्ति।




(ङ) एषः कः अस्ति?

............................ नर्तकः अस्ति।



(च) एषा का अस्ति?

............................ नर्तकी अस्ति।



(छ) एषः कः अस्ति?

............................ अध्यापकः अस्ति।



(ज) एषा का अस्ति?

............................ अध्यापिका अस्ति।

2. चित्राणि दृष्ट्वा रिक्तस्थानानि पूरयन्तु–

(क) एषः ........................ अस्ति?

एषः लेखकः अस्ति।

लेखकः किम् करोति?

........................ लिखति।



(ख) एषा ........................ अस्ति?

एषा महिला अस्ति।

महिला किम् करोति?

........................ पचति।




(ग) एतत् ........................ अस्ति?

एतत् फलम् अस्ति।

किम् फलम् पतति?

आम् ........................ पतति।



(घ) एषः ........................ अस्ति?

एषः सैनिकः अस्ति।

सैनिकः किम् करोति?

........................ देशम् रक्षति।



3. चित्रे किं किम् अस्ति इति वदन्तु लिखन्तु च–

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................

..............................





4. किं भवतः/भवत्याः गृहे 'अस्ति/नास्ति' इति लिखन्तु–

(क) लेखनी अस्ति? ........................ (घ) चित्रम् अस्ति? ........................

(ख) घटः अस्ति? ........................ (ङ) दर्पणः अस्ति? ........................

(ग) द्वारम् अस्ति? ........................ (च) पादत्राणम् अस्ति? ........................

5. **नामानि लिखत–**

(क)  ........................................................




(ख) ........................................................

(ग)  ........................................................



(घ) ........................................................

(ङ)  ........................................................



(च) ........................................................